# महाकविकालिदासरचनायां परिवेशभावना

महाकविः कालिदासः संस्कृतसाहित्ये विश्वप्रसिद्धः नाम । सः त्रयाणां नाटकानां रचयिता अस्ति। नाटकानि यथा - मालविकाग्निमित्रम्, विक्रमोर्वशीयम् अभिज्ञानशकुन्तलम् चेति। एतेषां त्रयाणां नाटकानां विश्लेषणं कृत्वा दृश्यते यत् प्रकृतिप्रेमी महाकविः कालिदासः स्वलेखनेषु एकप्रकारं परिवेशविचारं प्रवर्तयति स्म, परन्तु तत् निश्चितरूपेण समकालीनपरिवेशचिन्तनवत् स्पष्टं न भवति, यतः तस्मिन् समये परिवेशप्रदूषणं तावत् भयंकरं नासीत्। फलतः पर्यावरणप्रदूषणस्य उपायस्य विषये चिन्तनं तावत् स्पष्टं नासीत् ।

आधुनिकपरिवेशशास्त्रज्ञानाम् मते जलं, वायुः, तेजः, मौसमः, वनस्पतयः, पशवः च सन्ति ये मुख्याः कारकाः परिवेशस्य निर्माणं कुर्वन्ति । कालिदासस्य नाटकेषु एतेषु विषयेषु पर्याप्तं महत्त्वं दत्तम् अस्ति ।

**मालविकाग्निमित्रम्-**

**प्राकृतिकपरिवेशः तस्य प्रभावश्च-**

कालिदासः प्रकृतेः कविः । प्रकृत्या सह तस्य योगः तीव्रः अस्ति। अत एव तस्य नाटके प्रकृत्या सह जीवनस्य सुसम्बन्धः, जीवानां उपरि पपरिवेशस्य प्रभावः च स्पष्टतया चित्रितः अस्ति । मालविकाग्निमित्रस्य द्वितीयाङ्के बैतालिकस्य कथनेन प्रकृतेः मध्याह्नस्य प्रभावः जीवस्य उपरि स्पष्टतया दृश्यते।

"विजयतां (जयतु जयतु) देवः । उपारुटो मध्याह्नः । तथाहि-

पत्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मीनां

सौधान्यत्यर्थततापाद्वलभिपरिचयद्वेषिपारावतानि।

विन्दूत्क्षेपात् पिपासुः परिसरति शिखि भ्रान्तिमद्वारियन्त्रं

सवैर्वरुस्रैः समग्रस्त्वमिव गुणैदीप्यते सप्तसप्तिः"॥ (२/१२)

नाटकस्य तृतीयाङ्के मदनासन्तप्तः राजा अग्निमित्रः वसन्तागमने तस्य प्रभावे च मोहितः जातः। – "अभिजातः खलु बसन्त: सखे"।

वसन्तस्य आगमने प्रमोदकाननसौन्दर्यं राज्ञां प्रति विदूषकस्य वचनम् –

"एतत् खलु भवन्तमिव विलोभयितुकामया प्रमोदवनलक्ष्म्या युवतीवेशलज्जापयितृकं कुसुमनेपथ्यं गृहीतम्"।

चतुर्थे अङ्के विदूषकस्य राज्ञः च अशोकवृक्षस्य उद्धारार्थं प्रयत्नः दृश्यते । विदूषकः वकुलवलिकाम् अवदत् यत् मृगः अशोकवृक्षस्य पत्राणि न खादतु इति। राजा च विदूषकस्य अपि समर्थनम् अकरोत् । विदूषकः उक्तम्- "वकुलवलिके! अशोकपल्लवानि अभिलङ्घयितुम् इच्छति हरिणः निरवायावः एनम्"। राजा- "एवमेवास्मिन् रक्षणणीयेऽविलम्वितेन भवितव्यम् |

-विदूषकस्य राज्ञश्च एषः प्रयासः परिवेशरक्षणस्य अनुकूलः अस्ति ।

**विक्रमोर्बशीयम्-**

**प्राकृतिकपरिवेशः तस्य प्रभावश्च-**

यदि विक्रमोर्वशियमनाटकस्य घटनानां अनुसरणं कुर्मः तर्हि दृश्यते यत् अत्र अपि परिवेशस्य भिन्नभिन्नघटनानां भिन्नवर्णनविशेषेण उपमया स्थानं प्राप्तम्। प्रथमाङ्के स्वच्छसालिलया गङ्गया सह उर्वशी तुलना कृतम्-

"ममोहेनन्तर्वरतनरियं लक्षते मुक्तकल्पा गंगारोधपतनकलुषा गृह्नतीव प्रसादम्"। (१/६)

प्रथमे अङ्के चित्ररथं मेघैः सह सौदामिण्या सह हस्तेभूषणानि तुल्यताम्-

"अयं च गगनात् कोऽपि तप्तचामो कराङ्गदः ।

अवरोहति शैलाग्रं तरितानिव तोयदः"।।१/१३)

**अभिज्ञानशकुन्तलम् –**

**पञ्चमहाभूतानां उल्लेखः-**

महाकवेः कालिदासस्य श्रेष्ठरचना अभिज्ञान शकुन्तलम् । अस्मिन् नाटके कालिदासस्य परिवेशचेतनायाः अपि परिचयः भवति । नाटकादौ नन्दिश्लोके अष्टशिरशिवस्य शुभाभिलाषः क्रियते । शिवस्य अष्टरूपेषु पञ्चमहाभूताः यथा- क्षितिः आप्तेजः मरुत्, ब्योम् चन्द्रः सूर्यश्च । एते सर्वे अस्माकं पार्थिवपरिवेशस्य महत्त्वपूर्णाः पक्षाः सन्ति।

**प्राकृतिकपरिवेशः तस्य प्रभावश्च-**

प्रथमाङ्के राजा शकुन्तलायाः सौन्दर्यं वर्णितम् -

“मालिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।

यमधिकमनोज्ञा वल्कलेनापि तन्वी ।।(१/१८)

**पशूपक्षीनां गुरुत्वम्-**

अभिज्ञानशकुन्तले मनुष्याणां पशूनां च अदृश्यः सम्बन्धः अस्ति । नाटकादौ बैखानसः मृगयाराजः दुष्यन्तं पशुवधं निषेधयति-

“न खलु न खलु वाण: सन्निपात्योऽयमस्मिन् ।

मृदुनि मृगसरीरे (तुलराशाविवाग्निः) पुष्पराशाविवाग्निः”(१/१०)

अभिज्ञानशकुन्तले सप्तमाङ्के अद्भुतं दृश्यं दर्शयति। दुष्यन्तस्य पुत्रः सर्वदमनः सिंहशावकस्य केशकर्षणेन क्रीडन् तस्य दन्तगणनाय प्रयतते-

“अर्धपितस्तनं मतुरामर्दक्लिष्टकेसरम् ।

प्रक्रीडितुं सिंहशिशुं वलात्कारेण कर्षति ।। जृम्भस्व सिंहः । दन्तन्ते गणयिष्ये” ।(८/१४)

कालिदासः अनेन अभिप्रेतवान् स्यात् यत् वन्यजीवाः एव न हानिकारकाः हन्ति च इति । कदाचित् वशीकृताः भवन्ति। ते अपि परिवेशस्य अङ्गाः । स्मृतिशास्त्रेऽपि वन्यपशवः न वध्यन्ते इति उक्तम् ।

एवं प्रकारेण महाकाविः प्राकृतिकपरिवेशेन सह जीवनस्य सम्बन्धस्य वर्णनं कृत्वा स्वस्य परिवेशजागरूकतां दर्शितवान् अस्ति।

-- By Sanjoy Barman